## (775) “ञि तृष पिपासायाम्”

(IV-दिवादिः-1228. अक. सेट्. पर.)

तर्षकः-र्षिका, तर्षकः-र्षिका, तितर्षिषकः-षिका, तरीतृषकः-षिका ;
तर्षिता-त्री, तर्षयिता-त्री, तितर्षिषिता-त्री, तरीतृषिता-त्री ;
[1]तृष्यन्-न्ती, तर्षयन्-न्ती, तितर्षिषन्-न्ती ; —
तर्षिष्यन्-न्ती-ती, तर्षयिष्यन्-न्ती-ती, तितर्षिषिष्यन्-न्ती-ती ; —
— तर्षयमाणः, — तरीतृष्यमाणः ;
— तर्षयिष्यमाणः, — तरीतृषिष्यमाणः ;
[2]तृट्-तृड्-तृषौ-तृषः ; — — —
[3]तृषितम्-[4]तृषितः-तृषितवान्, तर्षितः, तितर्षिषितः, तरीतृषितः-तवान् ;
तृषः, [5]तृष्णक्[A], प्रतर्षी, तर्षः, तितर्षिषुः, [6]तरीतर्षः ;
तर्षितव्यम्, तर्षयितव्यम्, तितर्षिषितव्यम्, तरीतृषितव्यम् ;
तर्षणीयम्, तर्षणीयम्, तितर्षिषणीयम्, तरीतृषणीयम् ;
[7]तृष्यम्, तर्ष्यम्, तितर्षिष्यम्, तरीतृष्यम् ;
ईषत्तर्षः-दुस्तर्षः-सुतर्षः ; — — —

---

1. ‘दिवादिभ्यः—’ (3-1-69) इति श्यन् विकरणप्रत्ययः। ‘शप्श्यनोर्नित्यम्’ (7-1-81) इति नित्यं नुमागमः।
2. कर्तरि क्विपि, षकारस्य जश्त्वचर्त्वयो रूपमेवम्।
3. ‘ञि तृषा पिपासायाम्’ इति **सिद्धान्तकौमुद्यां** मुद्रितः पाठो दृश्यते। तदानीं धातोरादित्त्वेन, ‘आदितश्च’ (7-2-16) इति निष्ठायां नित्यमिण्णिषेधे, ष्टुत्वे च **तृष्टम्-तृष्टवान्** इति रूपं स्यात्। एवम्, भावे आदिकर्मणि च ‘विभाषा भावादिकर्मणोः’ (7-2-17) इति सूत्रेण निष्ठाया इड्विकल्पोऽपि स्यात्। परं तु **क्षीरतरङ्गिणी-माधवधातुवृत्ति-धातुकाव्यव्याख्याना**दिपरामर्शनेन **तृष** इति पाठ एव साधुरिति प्रतिभाति। अस्य धातोरादित्त्वफलं चिन्त्यमेव।
4. ‘ञीतः क्तः’ (3-2-187) इति वर्तमाने क्तप्रत्ययः।
5. ‘स्वपितृषोर्नजिङ्’ (3-2-172) इति तच्छीलादिषु कर्तृषु नजिङ् प्रत्ययः। ‘चोः कुः’ (8-2-30) इति कुत्वम्। ‘रषाभ्यां नो णः समानपदे’ (8-4-1) इति णत्वम्। प्रत्ययस्य ङित्त्वाद् गुणनिषेधः।
6. ‘यङोऽचि च’ (2-4-74) इति यङो लुकि गुणः।
7. ‘ऋदुपधात्—’ (3-1-110) इति भावकर्मणोः क्यप्।

A. ‘जिह्मं नुनुद्रेऽवतं तया दिशा सिञ्चन्नुत्सं गोतमाय तृष्णजे।’ ऋग्वेदे 1.85-11.